# पुUना International School
## Shree Swaminarayan Gurukul, Zundal

| PA-3 EXAM 2020-21 | | | | | |
|---|---|---|---|---|---|
| Student's Name | | | | | |
| Date | | Grade | IX | Roll No. | |
| Subject | SANSKRIT | Marks | 50 | Teacher's Sign | |

## खण्डः 'क'

## अपठितांश-अवबोधनम्

**Q-1.** अधोलिखितम् अनुच्छेदं पठित्वा यथानिर्देशं प्रश्नानाम् उत्तरम् लिखत-

सुभाषचन्द्रबोसः भारतस्य महान् स्वतंत्रतासेनानीः आसीत्। सः क्रान्तिकारी नेता आसीत् अस्य जन्म बङ्गप्रान्ते 1897 तमे ख्रीष्टाब्दे जनवरीमासस्य 23 दिनाङ्के अभवत्। अस्य पिता जानकीनाथबोसः आसीत्। अयं बाल्यकालादेव बुद्धिमान् धीरः साहसयुक्तः च आसीत्। सः कोलकातानगरे शिक्षा प्राप्तवान्। सः भारतस्य स्वतन्त्रतायै असहयोग-आन्दोलने कांग्रेसदलस्य सहयोगी जातः। सः महान् संघटनकर्तारूपेण 'आजाद-हिन्द फ़ौज' इत्याख्या सेनां संघटितवान्। सः देशे हिन्दू-मुस्लिमयोः एकतायाः कृते फारवर्ड-ब्लॉक इत्यस्य स्थापनां कृतवान्। जर्मनीदेशे आकाशवाण्या भारतीयजनेभ्यः स्वाधीनतायाः सन्देश दत्तंवान्। तस्य आह्वानं आसीत् - "यूयं मह्यं रक्तं ददातु अहं युष्मभ्यं स्वातन्त्र्यं दास्यामि"। सुभाषः भारतमातुः वीरसपूतः तथा देशभक्तानां कृते प्रेरणास्रोतः आसीत्।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) **(1/2×2=1)**

i. सुभाषचन्द्रबोसस्य पितुः नाम किम् आसीत्?
ii. सुभाषचन्द्रबोसः कुत्र शिक्षा प्राप्तवान्?
iii. कः देशभक्तानां कृते प्रेरणास्रोतः आसीत्?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1×2=2)**

i. सुभाषचन्द्रबोसः किमर्थं फारवर्ड-ब्लॉक इत्यस्य स्थापनां कृतवान्?
ii. सुभाषचन्द्रबोसस्य किम् आह्वानं आसीत्?
iii. जर्मनीदेशे आकाशवाण्या सुभाषः किं कृतवान्?

III. यथानिर्देशं प्रश्नान् उत्तरत- (केवलं प्रश्नचतुष्टयम्) **(1/2×4=2)**

i. 'क्रान्तिकारी नेता' इत्यनयोः पदयोः कि विशेषणपदम्?

ii. 'अनेकतायाः' इत्यत्र विलोमपदं गद्यांशात् चित्वा लिखत।

iii. 'स्वाधीनता' इत्यस्य समानार्थकं पदं गद्यांशात् लिखत।

iv. 'सः बुद्धिमान् धीरः साहसयुक्तः च आसीत्।' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

v. 'अहं युष्मभ्यं स्वातन्त्र्यं दास्यामि' अस्मिन् वाक्ये 'अहं' इति पदं कस्मै प्रयुक्तम्?

## खण्डः **'ख'**

## रचनात्मक-कार्यम्

**Q-2.** अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत- **(1×5=5)**



| मंजूषा- |
|---|
| समुद्रतटः, भ्रमणाय, स्नानम्, वैदेशिक व्यापाराय, कुर्वन्ति, गर्जनम्, नारिकेलवृक्षाः, जलयानम्, लवणयुक्तम्, जलम्, जनाः, रत्नागारः, अटन्ति, भवन्ति, कथ्यते। |

## अथवा

मंजूषा प्रदत्तानां पदानां सहायतया निम्नलिखित विषयम् अधिकृत्य पंचभिः वाक्यैः अनुच्छेद लिखत। (केवल-दृष्टिबाधित-छात्राणां कृते)

## "पुस्तकालयः"

| मंजूषा- |
|---|
| पुस्तकानि, मनसा, आगच्छन्ति, ग्रन्थाः, ज्ञानवर्धनाय, अध्ययनम्, जनाः, छात्राः, विषयाणाम्, विद्यालये, पुस्तकालयः, स्थातव्यम्, पठन्ति, समाचारपत्रम्, अस्ति, कुर्वन्ति, सन्ति |

**Q-3.** अधोलिखितानां केषाञ्चित प्रश्नद्वयम् वाक्यानां संस्कृत-भाषया अनुवादं कुरुत **(1×2=2)**

i. अमर चिकित्सक है। / Amar is a doctor.
ii. हमलोग घूमने जाते हैं। / We go to walk.
iii. मैं पत्र लिखता हूँ। / I write a letter.

## खण्ड 'ग'

## अनुप्रयुक्त-व्याकरणम्

**Q-4.** अधोलिखितेषु वर्णसंयोगस्थाने विच्छेदस्थानेषु वा रिक्तस्थानपूर्तिं कुरुत - (केवलं प्रश्नद्वयम्)

**(1/2× 2=1)**

**I.**

i. स्+त्+र्+ई+ल्+इ+ङ्+ग्+अः = _________
ii. विद्यालयः = व्+इ+द्+_____+आ+ल्+अ+य्+अः
iii. कृतिका = _____________

**II.** अधोलिखितानां वर्णानां उच्चारणस्थानं लिखत - (केवलं प्रश्नद्वयम्) **(1×2=2)**

i. क्
ii. इ

iii. ष्

**Q-5.** अधोलिखितेषु वाक्येषु रेखांकितपदानां सन्धिं / विच्छेदं वा कुरुत - (केवलं प्रश्नद्वयम्) **(1×2=2)**

i. सः केनापि सज्जनेन प्रेरितः अस्ति।

ii. चन्द्रोदयः रात्रौ भवति।

**Q-6.** अधोलिखितवाक्येषु कोष्ठक प्रदत्तपदे विभक्ति निर्देशानुसारम् उचित शब्दरूपैः रिक्तस्थानपूर्ति कुरुत - (केवलं प्रश्न द्वयम्) **(1×2=2)**

i. राजा __________ पुरस्कारं ददाति। (मुनि-चतुर्थी)

ii. __________ बालकेन कुत्र गम्यते? (तत् - तृतीया)

**Q-7.** निम्नवाक्येषु कोष्ठक प्रदत्तधातुभिः सह समुचितं रूपं संयोज्य रिक्तस्थानपूर्तिं कुरुत- (केवलं प्रश्नद्वयम्)

**(1×2=2)**

i. कक्षायां चत्वारिंशत् छात्राः __________। (अस् - लट्)

ii. कक्षायां छात्राः मनसा __________। (पठ् - लृट्)

iii. श्वः वर्षा __________। (भू - लृट्)

**Q-8.** समुचितां कारकविभक्तिं उपपदविभक्तिं वा प्रयुज्य रिक्तस्थानपूर्तिं कुरुत - (केवलं प्रश्नत्रयम्)

**(1×3=3)**

i. __________ परितः वृक्षाः सन्ति। (ग्राम)

ii. श्री __________ नमः। (गणेश)

iii. __________ सह पिता गच्छति। (बालिका)

iv. __________ बहिः गच्छ। (गृह)

**Q-9.** रेखांकितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत - (केवलं प्रश्नद्वयम्) **(1×2=2)**

i. सः लिख् + तुमुन् कर्गदम् आनयति।

ii. मोहनः सुखम् अनुभूय प्रसन्नः भवति।

iii. बालकः <u>पठ् + क्त्वा</u> गृहम् आगच्छति।

**Q-10.** अधोलिखितपदेषु उपसर्गान् पृथक् कृत्वा संयोज्य वा लिखत - (केवलं प्रश्नचतुष्टयम्)

**(1/2×4=2)**

i. उपहारः
ii. प्रकाशः
iii. दुर्जनः
iv. निर्+गुणः =
v. परा + अधीनः =

## खण्ड - 'घ'

## पठितांश-अवबोधनम्

**Q- 11.** अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च विभवक्षयाद्देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्-

यत्र देशेऽथवा स्थाने भोगा भुक्ताः स्ववीर्यतः।
तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः॥

तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत् । तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तर यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच- "भोः श्रेष्ठिन् ! दीयतां मे सा निक्षेपतुला।" स आह- "भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति। जीर्णधन आह-"भोः श्रेष्ठिन् ! नास्ति दोषस्ते, यदि मूषकैर्भक्षितेति। ईदृगेवायं संसारः। न किञ्चिदत्र शाश्वतमस्ति। परमहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय" इति। स श्रेष्ठी स्वपुत्रमुवाच- "वत्स! पितृव्योऽयं तव, स्नानार्थं यास्यति, तद् गम्यतामनेन सार्धम्" इति।

1. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(1×2=2)**
    i. वणिक्पुत्रस्य किं नाम आसीत्?
    ii. तुला कैः भक्षिता?
    iii. कः उक्तवान् तुला मूषकैर्भक्षिता इति?
2. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1×2=2)**

i. वणिक्पुत्रः किमर्थं देशान्तरं गन्तुमिच्छति?
ii. श्रेष्ठी स्वपुत्रं किम् उवाच?
iii. वणिक्पुत्रः तुलां कस्य गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः?

**Q-12.** अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत-

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
सुस्वादुतोयाः प्रभवन्ति-नद्यः समुद्रमासाद्य भवन्त्यपेयाः॥

**I.**एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(1×2=2)**

i. गुणाः केषु गुणाः भवन्ति?
ii. सुस्वादुतोयाः के प्रभवन्ति?
iii. नद्यः किं प्रभवन्ति?

**II.** यथानिर्देशम् उत्तरत - (केवल प्रश्नचतुष्टयम्) **(1/2x4=2)**

i. दोषाः अस्य विलोमपदं श्लोके किम् अस्ति?
ii. 'जलम्' अस्य पदस्य पर्यायपदं श्लोके किम् अस्ति?
iii. 'ते निर्गुणं प्राप्य भवन्ति दोषाः।' इत्यस्मिन् वाक्ये किं क्रियापदम्?
iv. 'नद्यः सुस्वादुतोयाः प्रभवन्ति।' इत्यस्मिन् वाक्ये कर्तृपदं किमस्ति?
v. 'सुस्वादु-तोयाः' अनयोः पदयोः विशेषणपदं किमस्ति?

**Q-13.** अधोलिखितं नाट्यांश पठित्वा प्रश्नान् उत्तरत-

श्वेतकेतुः- भगवन् ! श्वेतकेतुरहं वन्दे।
आरुणिः- वत्स! चिरञ्जीव।
श्वेतकेतुः- भगवन् ! किञ्चित्प्रष्टुमिच्छामि।
आरुणिः- वत्स! किमद्य त्वया प्रष्टव्यमस्ति?
श्वेतकेतुः- भगवन् ! प्रष्टुमिच्छामि किमिदं मनः?
आरुणिः- वत्स! अशितस्यान्नस्य योऽणिष्ठः तन्मनः।
श्वेतकेतुः- कश्च प्राणः?
आरुणिः- पीतानाम् अपां योऽणिष्ठः स प्राणः।
श्वेतकेतुः- भगवन् ! केयं वाक्?
आरुणिः- वत्स ! अशितस्य तेजसा योऽणिष्ठः सा वाक्। सौम्य! मनः अन्नमयं, प्राणः आपोमयः, वाक् च तेजोमयी भवति इत्यप्यवधार्यम्।

**I.** एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) **(1×2=2)**

1. कः आरुणिं वन्दते?
2. कस्य अणिष्ठः भागः मनः?
3. कः किञ्चित्प्रष्टुम् इच्छति?

**II.** यथानिर्देशम् उत्तरत - (केवल प्रश्नचतुष्टयम्) **(1/2 ×4=2)**

i. 'श्वेतकेतुरहं वन्दे' इत्यस्मिन् वाक्ये कि क्रियापदम्?
ii. 'पीतानाम् अपाम्' इत्यत्र विशेषणं किम्?
iii. 'अद्य त्वया प्रष्टव्यमस्ति इत्यत्र किं अव्ययपदम् प्रयुक्तम्?
iv. 'सूक्ष्मतमः' इत्यर्थे पर्यायपदं चित्वा लिखत।
v. अशितस्य अन्नस्य' इत्यत्र विशेष्यपदं किम् अस्ति?

**Q-14.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- (संपूर्ण प्रश्नवाक्यं लेखनीयम्)(केवलं प्रश्नद्वयम्)

**(1×2=2)**

i. सर्वेषां प्राणीन संरक्षणाय <u>प्रकृतिः</u> यतते।
ii. <u>सोमप्रभा</u> प्रविश्य एतत् पश्यति।

**Q-15.** अधोलिखितस्य श्लोकस्य अन्वये रिक्तस्थानपूर्ति कुरुत।

I. प्रियावाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता।। **(1/2×4=2)**

अन्वयः (i)__________ सर्वे (ii)__________ तुष्यन्ति। तस्मात् (iii)__________

वक्तव्यं (iv)__________ का दरिद्रता?

II. सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृधं ददर्शायतलोचना।। **(1/2×4=2)**

अन्वयः- तदा (i)__________ करुणाः (ii)__________ विलपन्ती आयतलोचना
(iii)__________ वनस्पतिगतं (iv)__________ ददर्श।

मंजूषा- गृध्र, वचने, जन्तवः, वचः , तदेव, प्रियवाक्यप्रदानेन, सुदुःखिता

<u>अथवा</u>

श्लोकस्यास्य भावार्थं मजूषायां प्रदत्तपदानां सहायतया पूरयित्वा लिखत- **(1×4=4)**

यत्रापि कुत्रापि गता भवेयुः हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः यह विप्रयोगः।।

भावार्थ- हंसाः महीमण्डलमण्डनाय यत्र कुत्र अपि (i)__________ भवेयुः (तथा भूते) हानिः तु तेषां (ii)__________ हि (भवति) येषां (iii)__________ सह (iv)__________ ( भवति)।

मंजूषा- [मरालैः, विप्रयोगः, सरोवराणां, गताः]

**Q-16.** अधोलिखितेषु पदेषु पर्यायपदेन सह मेलनं कुरुत- **(1×4=4)**

| | |
|---|---|
| (i) दुहिता | (क) गवाक्षः |
| (ii) वातायनम् | (ख) प्राक् |
| (iii) वाक् | (ग) पुत्री |
| (iv) पूर्वम् | (घ) वाणी |